Topic 68

## नकारान्त शब्द 2,

मघवा बहुलम् ।

'मघवन्' शब्दस्य वा तृ इत्यन्तादेशः। ऋ इत्।

उगिदचां सर्वनामस्थानेऽधातोः।

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात् सर्वनामस्थाने परे। मघवान्, मघवन्तौ, मघवन्तः। हे मघवन्! मघवद्भ्याम्। तृत्वाभावे - मघवा। सुटि राजवत्।

मघोनः

'मघवन्' शब्द के स्थान पर विकल्प से 'तृ' आदेश होता है। यद्यपि य 'तृ' आदेश अनेकाल् होने से अनेकाल् 'शित्सर्वस्य' परिभाषा द्वारा सम्पूर्ण 'मघवन' शब्द के स्थान पर होना चाहिए, तथापि ('नानुबन्धकृतमनेकाल्त्वम्' परिभाषा से इसके अनेकाल्त्व का निषेध होने पर सर्वादेश नहीं होगा।

उगिदचां सर्वनामस्थानेऽधातोः।

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात् सर्वनामस्थाने परे। मघवान्, मघवन्तौ, मघवन्तः। हे मघवन्! मघवद्भ्याम्। तृत्वाभावे - मघवा। सुटि राजवत्।

श्वयुवमघोनामतद्धिते।

अन्नन्तानां भानामेषामतद्धिते संप्रसारणम्। मघोनः मघवभ्याम्। एवं श्वन्, युवन्।

न सम्प्रसारणे सम्प्रसारणम् ।

सम्प्रसारणे परत: पूर्वस्य यण: सम्प्रसारणं न स्यात् । इति यकारस्य नेत्वम् । अत: एव ज्ञापकाद् अन्त्यस्य यण: पूर्वं सम्प्रसारणम् । यून: । यूना । युवभ्याम् इत्यादि ।

अर्वणस्त्रसावनञ:

नञा रहितस्य 'अर्वन्' इत्यस्याङ्गस्य 'तृ' इत्यन्तादेशो न तु सौ । अर्वन्तौ । अर्वन्त: । अर्वद्भ्याम् इत्यादि ।